नं. ५०११

स्वप्न फल निर्णय:

पत्र २ —————— स. x

ज्योतिषं.

✓

© Dharmartha Trust J&K. Digitized by eGangotri

स्वप्नफलनिर्णयः

५०११

5011
F.=2

© Dharmartha Trust J&K. Digitized by eGangotri

ओम

ॐ तत्रादौ स्वप्नदर्शनावस्थामाह वैद्यः सर्वेंद्रियव्युपरतौ मनोनुपरतं सदा विषये
भ्यस्तदा स्वप्नं नानारूपं प्रपश्यतीति स च स्वप्नो द्विविधः इष्टफलो निष्टफलश्चेति
तत्र सामान्यत इष्टफलो यथा नदीसमुद्रतरणमाकाशगमनं तथा भास्करोदयनं
चैव प्रज्वलितं हुताशनं ग्रहनक्षत्रतारागणं चेंद्रमंडलदर्शनं हर्म्यस्यारोहणं चैवं प्रा
सादशिरसोपि वा एवमादीनि संदृष्ट्वा नरः सिद्धिमवाप्नुयात् स्वप्ने तु मदिरापा
नं वसामांसस्य भक्षणं क्रिमिविष्ठानुलेपं च रुधिरेणाभिषेचनं भोजनं दधि
भुक्तस्य श्वेतवस्त्रानुलेपनं रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा तु सिध्यति दे
वविप्रद्विजछत्त्रपंकजपार्थिवान् शुक्लपुष्पांबरधरान् प्रशस्ताभरणांग
नाः वृषभे पर्वते क्षीरिफलवृक्षाधिरोहणं दर्पणामिषमालाभिस्तरणं च
महांभसां दृष्ट्वा स्वप्नेर्थलाभः स्याद्व्याधिमुक्तश्च जायते इति सामान्यतो नि
ष्टफलो यथा प्रयकिंशुकवल्मीकपारिभद्राधिरोहणं तैलकार्पासपि^
ण्याकलोहावाप्तिर्विपन्नये विवाहकरणं स्वप्ने रक्तस्रग्वस्त्रधारणं स्रोत
साहरणं नेष्टं पक्वमांसस्य भोजनमिति तदेव द्विविधस्यापि स्वप्नदर्शन
कालभेदेन फलविभेदः स्वप्नाध्याये स्वप्नास्तु प्रथमे यामे संवत्सरविपा
किनः द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्त्रियामिके चतुर्थयामेयः स्वप्नो
मासेन फलदः स्मृतः अरुणोदयवेलायां दशाहेन फलं भवेत् गोविस
र्जनवेलायां सद्य एव फलं भवेदिति अथ विशेषत इष्टफलाः स्वप्नाः यस्तु
पश्यति वै स्वप्ने राजानं कुंजरं हयं सुवर्णं वृषभं गां वा कुटुंबं तस्य वर्द्धते आ
रोहणं गोवृषकुंजराणां प्रासादशैलाग्रवनस्पतीनां विष्ठानुलेपो रुदितं मृतं
वा स्वप्नेष्वगम्यागमनं च धन्यं क्षीरिणं फलिनं वृक्षं एकाकी यः प्ररो[illegible] तत्र
स्थः स विबुध्येत धनं शीघ्रमवाप्नुयात् यस्य श्वेतेन सर्पेण ग्रस्ते द[illegible]
करः सहस्रलाभस्तस्य स्याद्दशर्गे च दशमे दिने उरगो वृश्चिको वापि जलेयस
तियं नरं विजयं चाप्यसिद्धं च पुत्रं तस्य विनिर्दिशेत् प्रासादशैलमारुह्य समु
द्रं तरते नरः अविदासकुले जातो राजा भवति वै ध्रुवं यस्तु मध्ये तडागस्य
तेच घृतपायसं अश्वं दुःपुष्करेपत्रे तं विद्यात्स पृथिवीपति बालाकां कुररीं
क्रौंचीं दृष्ट्वा यः प्रतिबुध्यति कुलजां लभते कन्यां भार्यां स प्रियवादिनीं
निगडैर्बध्यते यस्तु बाहुपाशेन वा पुनः पुत्रो वा जायते तस्य यशं शीघ्रमवा
प्नुयात् आसने शयने [illegible] ने विबुध्येत तस्य श्रीस

© Dharmartha Trust J&K. Digitized by eGangotri

ओम्

मल्लिमयमंडपमध्ये क्रीडन्ती काऽपि कामिनी बाला अपराध
न विनाऽपि दयितं चरणेन ताडयामास ॥१॥ शृणु सखि कौ
तुकमेकं ग्रामेऽणु कामिना यदद्य कृतं सुरतसुखे निमी-
लिताक्षि मे तेन भीतेन त्यक्तास्मि ॥२॥ बालानन्वीम्य दृष्टिर्मि
लितमपतामत्र पांशुका दृष्ट्वा काचिद्भ्रमरभरतो मंजरी भज्यमाना न
स्नाहे शाखहस्तिभवता निर्दयं पीड्यमाना मेदाकांता वनितेव नितरां सं ने
त्रपरिग्रहमत्र ॥३॥

© Dharmartha Trust J&K. Digitized by eGangotri

र्वतोमुखी आदित्यमंडलं स्वप्ने चंद्रं वाथ दिवि पश्यति आधितो मुच्यते रोगाद् रोगी
श्रियमाप्नुयात् रुधिरं पिबति स्वप्ने सुरां वा पिबते यो नरः ब्राह्मणो लभते वि
द्यामितरो लभते धनं शुक्लांबरधरां नारीं शुक्लगंधानुलेपनां अवगूहति य
स्वप्ने श्रियं तस्य विनिर्दिशेत् पादुके वा नरो छत्रं लभ्यायः प्रतिबुध्यते अ
सिं वा निर्मलं नीलं तां सान्न द्द तस्य निर्दिशेत् रथं गोरथसंयुक्तमेकाकी यः
मरोहति तस्य स्यात् सविभूषेत धनं शीघ्रमवाप्नुयात् दधिलाभे भवेद्
प्रीघृतलाभे फवं यशः हुताशने ऋवः श्लेशो यशस्तु दधिभक्षणे
आंत्रैस्तु वेष्टितो यो वै नगरे पि गृहे पि वा स्वदेहमांडलिको राजा नगरे पा
र्थिको भवेत् मानुषाणि तु मांसानि स्वप्नांते यस्तु पश्यति हरितामित्तप
कानिः स्फुरितस्य च यत्फलं तद्भक्षणे प्रातं लाभः सहस्रं वा हु भक्षणे शत्ये
शतसहस्रं वा भवेद्वै शीर्षभक्षणे सर्वाणि शुक्लान्यपि शोभनानि कार्पास
भस्मोदनतक्रवर्ज्जं सर्वाणि कृष्णान्यति निंदितानि गोहस्ति देव द्विजवा
जिकर्णी क्षीरं पिबति यः स्वप्ने सफेनं दोहने कृते सोमपाने भवेत्तस्य धृत्काम
गानपोषणः दधि हस्ता भवेत्प्रीतिर्गोपमाद्यथनागमः यवान्यत्तागम
विद्यालाभं सिद्धार्थकान्यपि नागपत्रं लभेत्स्वप्ने कर्पूरमगरं तथा चंदनं
पांडुरं पुष्पं तस्य श्रीः सर्वतोमुखी अथ विशेषतो निःफलाः स्वप्नाः तत्र
शौनकः अथ स्वप्नानि वक्ष्यंते दुर्निमित्तास्तु तानि तु आदित्यं वाथ चंद्रं वा
विगतश्रीकं तथा पतनं वाप्य न दृष्टं तारकादींस्तथा वा यदि वीक्षते मा
नवः स्वप्ने मरणं शोकमाप्नुयात् स्वप्नान्ते पाये अशोकं करवीरं वा प
लाशं वाप्यपुष्पितं स्वप्नांते यस्तु पश्येत नरः शोकमवाप्नुयात् नाव
मारोहयेद्यस्तु नदीनां वसमुद्रे प्रसंनिर्दिशेत्तस्य शीघ्रं पुनरागमः र
क्तांबरधरां नारीं रक्तगंधानुलेपनां अवगूहति यः स्वप्ने मरणं तस्य विनिर्दि
शेत् तैलेनाभ्यक्तकायस्तु पयसा तु हतेन वा स्नेहेन वातथान्येन व्या
धिं तस्य विनिर्दिशेत् केशा यस्य विशीर्यंते यदि दंता पतंति वा अर्थ
नाशो भवेत्तस्य पुत्रो वा यदि नश्यति खरोष्ट्रमाहिषरथं एकाकी यः प्र
रोहति तस्य स्यः सत्वबुध्येत मृत्युः शीघ्रमवाप्नुयात् कण्टकानां शाक
रादीनां ... पंकमज्जनं पतनं दंतकेशानां पक्वमांसस्य भक्षणं
खरोष्ट्रमा... षेण ... तैलाभ्यंगं च अस्वप्ने इति स्वप्नफलनिर्णयः ॥
© Dharmartha Trust J&K. Digitized by eGangotri

मेहेंनिदेंसीक्योंलगावलहादोसमोप जेलीलोदि भावेतेती
सोहेंरटनायले" त्रिवलीत्रिबयनीनामकरसोंछुवानेरव चू
कोंतोंनिहारगागकीनोतोंहरायले' कंतुकवीऊदीमेदोलेप
स्वीहेंहिराजमान ताकांसीमछुवायदेरवेचारसायलिपटा
पले॥ कोपकरपावककपोरुगोलालालकर लाखला
खभांतमोपेंजीहूनसेंचटायले ॥७॥

रामः

© Dharmartha Trust J&K. Digitized by eGangotri